|| श्री गणेशाय नमः ||

# हरी ॐ धार्मिक पूजा विधी केंद्र

ज्योतिष आणि वास्तु सल्लागार

Astro • Puja • Vastu

## आयुष्य सूक्तम्

योे ब्रह्मा ब्रह्मण उ॑ज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवः स न आयु॑र्दधातु तस्मै जुहोमि हविषा॑ घृतेन ॥ 1 ॥

विभ्राजमानः सरिरस्य मध्या-द्रोचमानो घर्मरुचि॑र्य आगात् ।
स मृत्युपाशानपनु॑द्य घोरानिहायुषेणो घृतम॑त्तु देवः ॥ 2 ॥

ब्रह्मज्योति-र्ब्रह्म-पत्नी॑षु गर्भं-यँमादधात् पुरुरूपं जयंतम् ।
सुवर्णरंभग्रह-म॑र्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ 3 ॥

श्रियं-लँक्ष्मी-मौबला-मंबिकां गां षष्ठीं च यामिंद्रसेनै॑त्युदाहुः ।
तां-विँद्यां ब्रह्मयोनिगं सरूपामिहायुषे तर्पयामो घृतेन ॥ 4 ॥

दाक्षायण्यः सर्वयोन्यः स योन्यः सहस्रशो विश्वरूपा विरूपाः ।
ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषंताम् ॥ 5 ॥

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नंतु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजागं रीरिषो मोत वीरान् ॥ 6 ॥

एकः पुरस्तात् य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनगं साँपराये स नो हविर्घृत-मिहायुषैत्तु देवः ॥ 7 ॥

वसून् रुद्रा-नादित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान् गंधर्वाग्श्च पितृग्श्च विश्वान् ।
भृगून् सर्पाग्श्चांगिरसोऽथ सर्वान् घृतगं हुत्वा स्वायुष्या महयाम शश्वत् ॥ 8 ॥

विष्णो त्वं नो अंतमश्शर्मयच्छ सहंत्य । प्रतेधारा मधुश्चुत उथ्सं दुह्रते अक्षितम् ॥

॥ ॐ शांतिः शांतिः शांतिः ॥


# HARI OM DHARMIK PUJA VIDHI KENDRA

योगेशशास्त्री ढवळे (गुरुजी) : 95944 28749 | निलेशशास्त्री ढवळे (गुरुजी) : 86524 02078

**SANPADA OFFICE**
Office No.8, 1st Flr, Shiva Triveni Galleria CHS.,
Plot No. 13, Sector 8, Sanpada, Navi Mumbai

**GOVANDI OFFICE**
Shri Swaybhu Hanuman Mandir, Deonar
Mahanagarpalika Vasahat, Govandi, Mumbai.

hariom astrologers | hariom astrologers | hariom_astrologers
hariomastrologers@gmail.com | www.hariomastrologers.com